# Shri Narayanastavana Ashtakam

# શ્રીનારાયણસ્તવનાષ્ટકમ્

## Document Information

Text title : Shri Narayanastavana Ashtakam

File name : nArAyaNastavanAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc, aShTaka, stava, aShTaka

Location : doc_vishhnu

Author : dInAnAtha bhaTTa

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીનારાયણસ્તવનાષ્ટકમ્

મહાતેજઃપુઞ્જસ્ફુરદમલસિંહાસનવરે
સ્થિતં સર્વાધીશં નખકિરણવિદ્યોતિતસભમ્ ।
સિતચ્છત્રં પાર્શ્વસ્ફુરદમલસચ્ચામરયુગં
ભૃશં ધન્યો લબ્ધ્વા નયનપથિ નારાયણમહમ્ ॥ ૧॥

હસદ્વક્ત્રામ્ભોજં ચપલનયનાલોકિતજનં
લસન્મુક્તાહારં વિવિધકુસુમાપીડમુકુટમ્ ।
પ્રપઞ્ચત્પ્રાવારં ચરણવિલસન્નૂપુરમિદં
હરે ! રૂપં નિત્યં મમ મનસિ સમ્યક્ સ્ફુરતુ તે ॥ ૨॥

ઢં વિશ્વાસો મે તવ ચરણપદ્માશ્રિતજનો
ભવામ્ભોધેઃ પારં વ્રજતિ સહસા ત્વત્કરુણયા ।
ત્વમેવૈકઃ સ્વામી સકલજગતામિત્યપિ હરે
વિદિત્વા પાદૌ તે દૃઢતરમહં હ્યાશ્રયમિમૌ ॥ ૩॥

ન જાને શાસ્ત્રાણાં વિવિધમતસન્નિર્ણયમહં
પુરાણવ્રાતાનામપિ ચ બહુકલ્પાશ્રિતકથાઃ ।
નવા દેવર્ષીણાં પૃથગિહ મનોરઞ્જનવિધિ
પરં જાને સ્વામિન્ ! ભ્રમણહરણં તેઽત્ર શરણમ્ ॥ ૪॥

તપો નોગ્રં તપ્તં વ્રતનિયમદાનાનિ ચ મયા
ન ચેષ્ટાપૂર્તં વા શ્રવણમનનાભ્યાસદૃઢતા ।
ન ચીર્ણાન્યાપ્તું ત્વામિહ તદપિ યસ્ત્વં દૃશિ ગતો
ન જાને તદ્ધેતું ત્વદતિતરકારુણ્યત ઋતે ॥ ૫॥

ભૃશં પાપવ્રાતૈર્મદનમદમાનાદિભિરપિ
પ્રભો ! ગ્રસ્તસ્યાલં તવ ચરણપદ્મેક્ષણમિદમ્ ।
કથઙ્કારં મે સ્યાદ્યદિ ન પુરુકારુણ્યપદવીં
શ્રથા નાથ ! ત્વં ત્વયિ હિ તદિદં કેવલમહો ॥ ૬॥

બલં નો મે બુદ્ધેર્ન ચ સુદૃઢવૈરાગ્યવિલસ-
-ન્નિજાત્મજ્ઞાનસ્ય પ્રચુરનિયમાનામપિ હરે ! ।
વિમોક્તું સંસારાન્નિરતિશયમેકં હિ બિરુદં
વિલોક્ય સ્વીયં માં ભવજલનિધેરુદ્ધર નિજમ્ ॥ ૭॥

ન જાને ધર્માણામતિગહનકર્તવ્યસરણિ
ન શાસ્ત્રં મન્ત્રાણાં ન ચ વિવિધતન્ત્રાગમવિધિમ્ ।
ન વા ભક્તૈઃ કૃત્યં તવ ચરણપદ્માર્ચનવિધિં
તતો વન્દે દીનસ્તવ પદયુગં દણ્ડવદહમ્ ॥ ૮॥

ઇતિ શ્રીસત્સઙ્ગિજીવને તૃતીયપ્રકરણે ચતુર્દશે-અધ્યાયે
દીનાનાથ ભટ્ટકૃતં શ્રીનારાયણસ્તવનાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Narayanastavana Ashtakam*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*